गोच्छिष्टः संविशेन्नित्यं न नग्नः स्नानमाचरेत् ।
न गच्छेन्न पठेद्वापि न चैव स्वशिरः स्पृशेत् ॥”
इति कूर्म्मपुराणे उपरिभागे १५ अध्यायः ॥
पारिभाषिकनग्ना यथा,—
“येषां कुले न वेदोऽस्ति न शास्त्रं नैव च व्रतम् ।
ते नग्नाः कीर्त्तिताः सद्भिस्तेषामन्नं विगर्हितम् ॥”
इति मार्कण्डेयपुराणे सदाचाराध्यायः ॥
“ऋग्यजुःसामसंज्ञेयं त्रयी वर्णावृतिर्द्विज ! ।
एतामुज्झति यो मोहात् स नग्नः पातकी स्मृतः ॥
यस्तु संत्यज्य गार्हस्थ्यं वानप्रस्थो न जायते ।
परिव्राडपि मैत्रेय ! स नग्नः पापकृन्नरः ॥”
इति विष्णुपुराणे १८ अध्यायः ॥

नग्नः, पुं, (नज+क्तः । निष्ठातस्य नः ।) वन्दी । (यथा, नैषधे । १६ । २१ ।
“रतिरतिपतिदैवतश्रीकौ ध्रुवं विस्मयस्तरां प्रियवचसि यन्नग्नाचार्य्यां वदासतमां ततः ॥”) क्षपणकः । इति विश्वमेदिन्यौ ॥ शेषस्य पर्य्यायः । नग्नाटकः २ निर्ग्रन्थकः ३ भदन्तः ४ दिगम्बरकः ५ । इति हारावली । ११५ ॥

नग्नकः पुं, (नग्न एव । स्वार्थे कन् ।) नग्नः । नजते लज्जते इति नग्नकः ओ नज ङी व्रीडे इत्यस्मात् क्तः सुस्वाद्योदिदिति नः मनीषादित्वात् जस्य गः स्वार्थे कः । इति व्याकरणम् ॥

नग्नजित्, पुं, राजविशेषः । स च श्रीकृष्णपत्न्याः नाग्नजित्या जनकः । यथा, श्रीभागवते । १० । ५८ । ३२ ।
“नग्नजिन्नाम कौशल्य आसीद्राजातिधार्म्मिकः । तस्य सत्याभवत् कन्या देवी नाग्नजिती नृप ! ॥”

नग्नहु, [ऊ] स्त्री, (नग्नं करोति स्पर्द्धते अनेनेति । ह्वे + करणे क्विप् ।) नग्नहूः । इति भरतधृतामरमाला ॥ (बाहुलकात् कुप्रत्यये कृते पुंलिङ्गेऽपि दृश्यते । यथा, वाजसनेयसंहितायाम् ।१६।१४।
“आतिथ्यरूपं मासरं महावीरस्य नग्नहुः ॥”
“सर्जत्वक्त्रिफलाशुण्ठीपुनर्नवाचतुर्जातकपिप्पलीगजपिप्पलीवंशावकाहवच्छनाचित्रकेन्द्रवारुणश्वगन्धाधान्यकयवानीजीरकद्वयहरिद्राद्वयविरूढ़यद्रशोहय एकीकृता नग्नहुः ॥” इति । १६ । १ । मन्त्रटीकायां वेददीपः ॥)

नग्नहूः, पुं, (नग्नं करोति स्पर्द्धते येनेति । ह्वे + क्विप् ।) नानाद्रव्यकृतसुराबीजम् । बाखर इति ख्यातम् । इति भरतः ॥ तत्पर्य्यायः । किण्वम् २ इत्यमरः । २ । १० । ४२ ॥ कण्वम् ३ नग्नहु ४ इति तट्टीका ॥

नग्ना, स्त्री, (नग्न + टाप् ।) विवस्त्रा नारी । तत्पर्य्यायः । कोट्टवी २ कोटवी ३ नग्निका ४ नग्नयोषित् ५ । इति शब्दरत्नावली ॥ (अनुद्भिन्नकुचा कन्या । यथा, पञ्चतन्त्रे । ३ । २१७ ।
“ऋतुमत्यान्तु तिष्ठन्त्यां स्वेच्छादानन्तु दीयते । तस्मादुद्वाहयेन्नग्नां मनुः स्वायम्भुवोऽब्रवीत् ॥”)

नग्नाटः, पुं, (नग्नः सन् अटतीति । अट् + अच् ।) दिगम्बरः । इति हलायुधः ॥

नग्नाटकः, पुं, (नग्नाट एव । स्वार्थे कन् ।) दिगम्बरयोगी । इति हारावली । ११५ ॥

नग्निका, स्त्री, (नग्नैव । स्वार्थे कन् । टापि अत इत्वम् ।) विवस्त्रा । तत्पर्य्यायः । कोट्टवी २ कोटवी ३ कोटरी ४ । अप्राप्तरजस्का । तत्पर्य्यायः । गौरी २ अनागतार्त्तवा ३ । इत्यमरटीका च । गौरिका ४ । इति शब्दरत्नावली ॥ (अजातकुचा कन्या । यथा, पञ्चतन्त्रे । ३ । २१३ ।
“अथञ्जना भवेत् कन्या कुचहीना तु नग्निका ॥”)

नङ्गः, पुं, (नं नतिं गच्छतीति । गम + डः । बाहुलकात् मुम् ।) जारः । इति जटाधरः ॥ नां इति भाषा ॥

नज, ओ ई ङ व्रीडे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् । ईदित्वात् निष्ठायामनिट् ।) ओ ई, नग्नः । ङ, नजते । व्रीडे लज्जायाम् । इति दुर्गादासः ॥

नञ्, व्य, अभावसंज्ञकम् । समासे स्थितस्यास्य स्थाने स्वरे परेऽन् व्यञ्जने परे अकारो विकल्पेन भवति । यथा । अनन्तः नान्तः । अच्युतः नच्युतः । अस्यार्थाः षट् । सादृश्यम् १ यथा अब्राह्मणः ॥ अभावः २ यथा अपापम् ॥ अन्यत्वम् ३ यथा अपटः पटः ॥ अल्पत्वम् ४ यथा अनुदरी कन्या ॥ अप्राशस्त्यम् ५ यथा अकेशी ॥ विरोधः ६ यथा असुरः । इति मुग्धबोधटीकायां दुर्गादासः ॥ यथा, मेदिनी ।
“नञभावे निषेधे च स्वरूपार्थेऽप्यतिक्रमे । ईषदर्थे च सादृश्ये तद्विरुद्धतदन्ययोः ॥”
नकारश्च ॥

नट, नृत्ये । हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-नृत्ये अकं-हिंसे सकं-सेट् ।) नटति । इति दुर्गादासः ॥

नट, क भ्रंशे । त्विषि । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) भ्रंशोऽधःपतनम् । स्पन्दनार्थोऽयमिति रामः । क, नाटयति । इति दुर्गादासः ॥

नट, म नृतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) म, प्रणटयति । इति दुर्गादासः ॥

नटः, पुं, (नमतीति । नम + “जनिदाच्युसिति ।” उणां ४ । १०४ । इति डटः ।) शोणाकवृक्षः । (नटति नृत्यतीति । नट + अच् । यद्वा, नमतीति । नम + डटः) नर्त्तकः । नेटुया इति भाषा । (यथा, देवीभागवते । १ । ७ । ४२ ।
“त्वं क्रीड़से निजविनिर्म्मितमोहजाले नाट्ये यथा विहरते स्वकृते नटो वै ॥”)
तत्पर्य्यायः । शैलाली २ शैलूषः ३ जायाजीवः ४ कृशाश्वी ५ भरतः ६ । इत्यमरः । २ । १० । १२ ॥ सर्व्ववेशी ७ भरतपुत्त्रकः ८ धात्रीपुत्त्रः ९ रङ्गजीवः १० रङ्गावतारकः ११ । इति हेमचन्द्रः । २ । २४२ ॥ अशोकवृक्षः । इति मेदिनी । टे, २० ॥ किष्कुपर्व्वा । इति जटाधरः ॥ नल इति भाषा ॥ (मदनफलम् । तत्पर्य्यायो यथा,—
“मदनश्छर्दनः पिण्डी नटः पिण्डीतकस्तथा । करहाटो मरुवकः शल्यको विषपुष्पकः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अशोकः । अस्य पर्य्यायो यथा,—
“अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः । कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥”)
वर्णसङ्करजातिविशेषः । यथा, पराशरपद्धतौ ।
“शौण्डिक्यां शौण्डिकाज्जातो नटो वरुड़ एव च ।”
व्रात्यायां क्षत्त्रियाज्जातः । (यथा, मनुः ।१०।२२।
“झल्लो मल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च । नटश्च करणश्चैव खसो द्रविड़ एव च ॥”
हनूमन्मते दीपकरागस्य रागिणी । अस्या जातिः संपूर्णा । ग्रहं षड्जस्वरः । ग्रीष्मर्त्तौ दिवसान्तो गानसमयः । रागमालायामस्याः स्वरूपं रक्तवर्णा नारी नवयौवना सालङ्कृता अश्वारूढ़ा पुरुषवत् परिहितवसना निष्कोषकरवालं धृत्वा शत्रूनाक्रममाणा । इति सङ्गीतशास्त्रम् ॥ नारदपुराणमते श्रीरागस्य पुत्त्रः ॥

नटनं, क्ली, (नट + भावे ल्युट् ।) नृत्यम् । इत्यमरः ।१।७।१० ॥ (यथा, पञ्चतन्त्रे । ३ । २३७ ।
“किं गाण्डीवस्फुरगुरुधनास्फालनक्रूरपाणिर्नासीन्लीलानटनविलसन्मेखली सव्यसाची ॥”)

नटनारायणः, पुं, (नटानां नारायण इव ।) रागविशेषः । हनूमन्मते मेघरागस्य तृतीयपुत्त्रः । भरतमते दीपकरागस्य तृतीयपुत्त्रः । सोमेश्वरमते कल्लिनाथमते च षड्रागाणां शेषरागः । तस्य भार्य्याः षट् । यथा, त्रोटकी १ त्रिभङ्गी २ पूर्व्वी ३ गान्धारी ४ वराभा ५ सिन्धुमल्लारी ६ । सोमेश्वरमते तस्य रागिण्यो यथा । कामदा १ कल्याणी २ आभीरी ३ नाटकी ४ सारङ्गी ५ नटहम्मीरी ६ । रागिणीभिः सहास्य हिमर्त्तौ गानसमयः । इति सङ्गीतशास्त्रम् ॥

नटभूषणं, क्ली, (नटानां भूषणं मण्डनं यस्मात् ।) हरितालम् । इति रत्नमाला ॥

नटमण्डनं, क्ली, (नटानां मण्डनं यस्मात् ।) हरितालम् । इति हेमचन्द्रः । ४ । १२५ ॥

नटवरः, पुं, (नटेषु वरः श्रेष्ठः ।) नटश्रेष्ठः । यथा,
“वर्हापीड़ं नटवरवपुः कर्णयोः कर्णिकारम् ॥”
इति श्रीभागवतम् ॥

नटसंज्ञकः, पुं, (नटस्य संज्ञा संज्ञा यस्य । कप् ।) गोदन्ताख्यहरितालम् । इति त्रिकाण्डशेषः ॥ (स्वार्थे कन्) नटश्च ॥

नटान्तिका, स्त्री, (अन्तयति नाशयतीति । अन्त + ण्वुल् + टापि अत इत्वम् । नटस्य नटकार्य्यस्य अन्तिका ।) लज्जा । इति हारावली । १५३ ॥

नटी, स्त्री, (नटति शोभते इति । नट् + अच् । ङीष् ।) नलीनामगन्धद्रव्यम् । इत्यमरः ।२। ४ । १२६ ॥ (नटति नृत्यतीति । नट् + अच् । ङीष् ।) वेश्या । इति शब्दरत्नावली ॥ नटपत्नी च ॥ (यथा भागवते । ८ । ८ । १२ ।